८२

त्र्यंबक अशौचनिर्णयः

रघुनाथ धावडे
तार.
धुळे प. खानदेश.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥अथत्र्यंबकिप्रारंभः॥ रामशिव १६७५॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(८)

॥श्रीगणेशाय नमः॥ गणाधिपं नमस्कृत्य प्रत्यूहाद्रिपविं कृवीं॥ त्र्यंबकेण शुबो
धाय क्रियते शौचनिर्णयः॥१॥ अथ तः शावहृत श्चैव यो नरस्त्यं नंदुष्यति॥ स्फटबाधा
य बालानां प्रथमायं उच्यते यतः॥२॥ तत्र प्रागुपनयनात्कामचारवदद्भक्ष इति गो
तमोक्तेरनुपनीतस्य पित्रादिसंस्कार विनाशौचेनाधिकारः॥ उपनयनोत्तरमपि
ब्रह्मचारिणां॥ पित्रादिकर्मकरणएवाशौचाधिकारो नान्यत्र॥ तस्माद्द्विजानां स
मावर्तनोत्तरं कृत्स्नाशौचाधिकारः॥ स्त्रीशूद्रयोस्तु विवाहस्योपनयनस्थानापन्न
त्वेन विवाहोत्तरमेवाशौचाधिकारः॥१॥ अथ जननाशौचाधिकारः॥ तत्र गर्भिण्याः॥

शि.व
१

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

मासचतुष्टयपर्यंतंगर्भस्रावः॥स्रावइत्युच्यते॥तदागर्भिण्याः॥मासत्रयपर्यंतंत्रि
रात्रं॥चतुर्थमासेचतुरात्रमाशौचंमासस्यत्र्यंचंच॥पित्रादिसपिंडानांस्रावमात्रेस्नानशु
द्धिः॥इति॥२॥गर्भिण्याःपंचमषष्ठमासयोर्गर्भनाशः॥पातइत्युच्यते॥तत्रगर्भिण्याः
माससमसंख्यापंचषट्चदिनानिक्रमेणास्पृश्यत्वमशौचंपित्रादिसपिंडानांतु
त्रिरात्रंजननाशौचं॥मृतानांचेत्तुनास्ति॥इदमेवतात्पर्यतंसर्ववर्णसाधा
रणंवयोव्यवस्थानिमित्तमुक्तंतु॥इति॥३॥गर्भिण्याःसप्तमासप्रभृतिप्रसवेस
र्वेषांमातापित्रादीनांसपिंडानांविप्राणांदशाहं॥क्षत्रियाणां॥द्वादशाहं॥वैश्यानांपं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

त्र्यब०

(3)

२

च दशाहं ॥ अर्द्धाणां मासं ॥ सच्छूद्राणां मासार्द्धं ॥ जननाशौचे गर्भिण्याः दशाहम
स्पृश्यत्वं ॥ पितुः सापत्नमातुश्च स्नानात् ॥ प्राक् स्पृश्यत्वं ॥ स्नानोत्तरं स्पृश्यत्वमेव ॥
किंतु सर्वत्र सपिंडानां कर्माधिकारमात्रं ॥ तत्रापि नालच्छेदनात् प्राग्जातकर्मादौ पि
तुरधिकारः ॥ एवं प्रथमषष्ट दशमदिवसेषु जन्मदानव्ये देवतापूजायां चापितुर्वे
चनाधिकारः ॥ कूटस्थमारभ्य सप्तमपुरुषपर्यंतं सापिंडाः ॥ ततः सस सोदकाः ॥ द्वितीय
सोदराणां [redacted] त्रिरात्रमाशौचं ॥ सगोत्राणां स्नानमात्रं ॥ इति पंचदशाः ॥ २
ऽगर्भिण्याः ॥ दशाहोत्तरं पुत्रोत्पत्तौ विंशतिदिनानि ॥ कन्यात्पत्तौ मासपर्यंतं कर्माधि

(3A)

कारः॥ इति षष्ठः॥ ६॥ अथ मृताशौचं॥ तत्र सर्वतामस्यस्वयच्चं कर्मानधिकारश्चैव स-
भयं भवति॥ मृतजाते त्रिरात्रो सर्वेषां सपिंडानां दशाहं जननाशौचं नास्ति॥ ७॥ नालछे-
दनात् सर्वत्रिरात्रो मृते मातुर्दशाहं॥ पित्रादि सपिंडानां जननाशौच मृताशौचं नास्ति॥
इति ०८॥ अथ वाक्यः॥ नालछेदनादूर्ध्वं शिशुमरणे दशाहं॥ जन्माशौचं सर्वेषां सपिं-
डानां मृताशौचं नास्ति॥ इति नवमः॥ ९॥ दशाहनंतरं नामकरणात् प्राक्शि-
शुमरणे स्नानमात्रेण शुद्धिः॥ मातापित्रोस्त्रिरात्रं॥ पुत्रमृतो॥ कन्या मृता दाहकाहः॥
नान्यः॥ पूर्वं खननामे नित्यं नोदक दानादि॥ अलंकरणे सर्वत्र॥ इति ०॥ १०॥ नाम

(७)

३ करणोत्तरं वर्षत्रयं पर्यंतं दाहखननयोर्विकल्पः स्तत्र ॥ इति ०११॥ नामोत्तरं दंतोत्पत्तेः प्राक्पुत्र
पुत्रमरणे दाहे सपिंडानां एकाहः ॥ खनने स्नानान्शुद्धिः ॥ मातापित्रोरप्यत्रापि एकाहः ॥ इति०॥
१२॥ दंतोत्पत्तेरूर्ध्वं वर्षत्रय पर्यंतं पुत्रमरणे दाहखनने वा सपिंडानामेकाहः ॥ मातापित्रोस्त्रि
रात्रं ॥ कन्यामरणे तु त्रिपुरुषसपिंडानां स्नानान्शुद्धिः ॥ मातापित्रोस्त्रिदिनमाशौचं ॥ इति ०१३ ॥ प्रथ
मवर्षादौ कृतचूडस्य पुत्रस्य मरणे मातापित्रोरपि सर्वसपिंडानां दिनमाशौचं नियतं ॥ दाहश्चनि
यतः इति ०॥१४॥ त्रिवर्षादूर्ध्वं कृतचूडस्याकृतचूडस्य वा पुत्रमरणे प्रागुपनयनात्सित्रादि क्रिय
सर्वसपिंडानां त्रिदिनमाशौचं ॥ उदकदानादि तूष्णीं ॥ कृतचूडस्य भूमौ पिंडदानं तूष्णीं ॥ २

(8A)

इति० ॥१५॥ कन्यायाः ॥ वर्षत्रयानंतरं वाग्दानात्प्राक् मरणे त्रिपुरुषसपिंडानां एका
हः ॥ मातापित्रोस्त्रिदिनं ॥ दाहोदकदानादि तत्रैव ॥ इति० ॥१६॥ वाग्दानोत्तरं विवाहात् प
प्राक् मृतासु कन्यासु भर्तृतत्कुले सप्तपुरुषसपिंडानां पित्रादिनां सर्वेषां त्रिदिनमाशौचं
दाहोदकदानादि तत्रैव ॥ इति० ॥१७॥ उपयनोत्तरं मृतस्य पुरुषस्य सर्वेषां सपिंडानां
विप्राणां दशाहं ॥ क्षत्रियाणां द्वादशाहं ॥ वैश्यानां पंचदशाहं ॥ शूद्राणां मासं ॥ स शूद्रे
णं मासार्द्धं ॥ सोदकानां त्रिरात्रं ॥ गोत्रजानां स्नानाच्छुद्धिः ॥ इति० ॥१८॥ विवाहोर्द्ध्वं क
न्यायाः ॥ पितृगृहे मरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रं ॥ पितृव्यादीनां एकाहः ॥

त्र्यंब०

(5)

४

इति०॥१९॥ऊढायाः कंन्यायाः पित्तगृहे प्रसवे मातापित्रोस्त्रिरात्रं॥सोदरस्यैकरात्रं॥पितृ
व्यादीनां एकाहः॥इति केचित्॥इति०॥२०॥ऊढायाः कंन्यायाः पित्तगृहे प्रसवे पित्रादीना
माशौचं नास्ति॥इति०॥२१॥ऊढायाः कंन्यायाः पित्तगृहे मरणे मातापित्रोस्त्रिरात्रं॥इति०॥
२२॥मातापित्रोर्मरणे ऊढपुत्र्यास्त्रिरात्रं॥दशाहांतः॥दशाहोर्ध्वं कालांतरे वत्सरांतरे पक्षि
णी॥अत्रैव वार्तिकं॥ताशौचं ब्राह्मणवचनाद्भवति॥नान्यत्र इति०॥२३॥भ्रातृभगिन्योः पर
स्परगृहे मरणे परस्परं त्रिरात्रं गृहांतरमृतौ परस्परं पक्षिणी॥इति०॥२४॥मातुलमर
णे॥भगिन्यपत्यस्य पक्षिणी॥उपकार मातुलमरणे त्रिरात्रं॥इति०२५॥मातुलान्या

शिव

४

(5A)

मरणे भ्रातभगिन्यपत्यस्य पक्षिणी॥इति०॥२६॥तु पत्नी तद्भागिनेयमरणे मातुलस्य
मातुलभागिन्याश्च पक्षिणी॥इति०॥२७॥मातामहमरणे दुहित्रपत्यस्य त्रिरात्रं इति०
२८॥दौहित्रमरणे मातामहस्य मातामह्याश्च आशौचं त्रिरात्रं॥अनुपनीते तु मातामः
हस्य मातामह्याश्च पक्षिणी॥२९॥मातामह्यां मृतायां दुहित्रपत्यस्य पक्षिणी इति०॥३०
॥श्वश्रूश्वशुरयोर्मृतौ सत्यां जामातुः सन्निधौ त्रिरात्रं॥असन्निधौ पक्षिणी॥ग्रा
मांतरे चैकरात्रं॥३१॥जामातरि मृते श्वश्रूश्वशुरयोः स्नानाच्छुद्धिः॥एकग्राममात्रे
च मिति किंचित्॥श्यालके मृते तस्य भगिनीभर्तुरेकः॥श्यालकस्तु तन्मरणे तु स्नान

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

त्र्यंबं॰

(6)

५

मात्रं इति ॥ ३३ ॥ पितृष्वसरि मृतायां भ्रातुरपत्यपक्षिणी ॥ इति ॥ ३४ ॥ मातृष्वसरि मृता
यां स्वस्रपत्यस्य पक्षिणी ॥ इति ॥ ३५ ॥ आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्रा आत्मबांध
वाः ॥ मातुः मातृष्वसृपितृष्वसृमातुलपुत्राः मातृबांधवाः ॥ एते त्रिविधाः ॥ बांधवा बंधुत्र
यं तेषु मृतेषु पक्षिणी ॥ पितृष्वस्रादि [illegible] कन्यानाम् ऊढानां तु मरणे एकाहः ॥ इति ॥ ३६ ॥ द
त्तकमतो पूर्वोपरि पित्रोस्त्रिरात्रं ॥ सपिंडानामेकाहः ॥ इति ॥ ३७ ॥ पूर्वोपरि पित्रोर्मृतो द
त्तकस्य त्रिरात्रं ॥ इति ॥ ३८ ॥ दत्तकस्य पुत्रपौत्राणां मरणे जनने सपिंडानामेकाहः ॥ शिव
इति ॥ ३९ ॥ सपिंडे पुत्रीकृते दत्तके तु मृते सपिंडानां दशाह एव ॥ इति ॥ ४० ॥ आचार्य ५

(6A)

मरणे शिष्यत्रिरात्रं॥ तत्पुत्रपत्न्यां मरणे एकाहः॥ उपनीयाध्यापक आचार्य इत्यु
च्यते इति॥४१॥ वेदैकदेशाध्यापक उपाध्यायः॥ तन्मरणे शिष्यस्यैकरात्रं॥ शिष्य
स्योपनीतस्य मरणे गुरोस्त्रिरात्रं॥ परोपनीतस्य मरणे तु एकरात्रं सहाध्यायिनो
मृतो एकग्रामीणे श्रोरनुचानश्रोत्रीययोर्मृतोच एकाहः॥ इति॥४२॥ सांगवेदा
ध्यायी अनूचानः वेदमात्राध्यायी श्रोत्रियः अध्ययनशास्त्रार्थस्यापि ज्ञानपर्यव
सायित्वं न्यायसिद्धः॥ इति॥४३॥ असपिंडस्यापि श्रोत्रियस्य मैत्र्यादिसंबंधस्य
यद्गृहे मरणे तद्गृहस्वामिनो एकरात्रं॥ इति॥४४॥ वानप्रस्थयतीनो षंढे च मृते स

त्र्यंब०

(७)

६

पिंडगनांस्नानं इति ॥४५॥ अथातिक्रांताशौचं तत्र जनने तिक्रांताशौचं नास्ति ॥
पितुः स्नानं तत्रापि भवति ॥ मृतके तु अनुपनीतमरणादिनिमित्तकत्रिरात्रादिषु ॥
भगिनीमातुलमरणे निमित्तत्रिरात्रादिषु च अतिक्रांताशौचं नास्ति ॥ किंतु दशा
हादिमृताशौचं विषयमेव ॥ इति ॥४६॥ दशाहमध्ये जनने मरणे वा ज्ञातपुत्रा
दीनां सर्वेषां शेषेनैव शुद्धिः ॥ संस्कारमपि शेषेणैव समापयेत् ॥ अस्थिपूर्ण
दारसंस्कारमपि शेषेणैव समापयेत् ॥४७॥ अथ त्रिरात्रमध्ये समानोदकमर
णे ज्ञातिसमानोदकानां शेषेणैव शुद्धिः ॥ त्रिरात्रे अतिक्रांते तु दशाहमध्ये ज्ञाते

त्रिंश

६

Joint ... the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

पिनाशौचं ॥ किंतु स्नानमात्रं ॥ अयमेव आम्नायो मातुलादि त्रिरात्रादिषु ज्ञेयः ॥ इ
ति ॥ ४८ ॥ मातापित्रोर्मरणे दूरदेशापि वत्सरांतरेपि श्रवणे पुत्रो दशाहादि पूर्णमे
वाशौचं कुर्याद्वा ॥ इति ॥ ४९ ॥ पुंसोः परस्परस्य देशांतरे वत्सरांतेपि पूर्णमेव
दशाहादि भवति ॥ इति ॥ ५० ॥ सापत्नमातुर्मरणे सपत्नीषु परस्परस्य मृता सु
परस्परदेशाकालानपेक्षं दशाहादि पूर्णं पाशौचं भवति ॥ इति ॥ ५१ ॥ मरणे
संवत्सरेर्ध्वं ॥ अपि देशांतरेपि विदेशे पित्रिरात्रं ॥ इति ॥ ५२ ॥ औरसपुत्रमृ
ते संवत्सरादूर्ध्वमपि देशांतरेपि मातापित्रो त्रिरात्रं ॥ इति ॥ ५३ ॥ दशा

व्यव॰

(8)

७ होर्ध्वमेकदेशे ज्ञातिमरणे ज्ञाते मासपर्यंतं त्रिरात्रं ॥ षण्मासपर्यंतं पक्षिणी ॥ न
वमासपर्यंतमेकदिनं ॥ तदनंतरं स्नानमिति केचित् ॥ वृद्धवसिष्ठः ॥ पक्षत्रयपर्यंतं
त्रिरात्रं ॥ षण्मासपर्यंतं पक्षिणी ॥ वर्षपर्यंतमेकरात्रं ॥ तदूर्ध्वं स्नानमिति माधवः ॥
देवलः अत्रापवादना ॥ य ॥ देशविषयेन व्यवस्था इति ॥ ५४ ॥ दशाहोर्ध्वं देशांतरे
ज्ञातिमरणे ज्ञाते त्रिपक्षपर्यंतं त्रिरात्रं ॥ ततः मासषट्कपर्यंतं अहोरात्रं ॥ ततो शिव ७
वर्षपर्यंतं दिवा श्रवणे आसायं ॥ रात्रिश्रवणे आप्रातः रात्रेः चं वत्सरांते स्ना
नात् शुद्धिः इति केचित् ॥ तन्माधवोदाहृतं ॥ विस्मरयज्ञान विसीत मिति ह्रेयं इति ॥ ५५ ॥

(8A)

देशांतरे मृतं श्रुत्वा गोत्रजा बांधवास्तथा ॥ अहःसद्यःस्तु शुध्यंति मातापित्रोर्दि
शाहनि ॥५६॥ इति माधवोक्तेः ॥ देशांतरं तु विप्रस्य विंशति योजनात्परं ॥ क्षत्रियस्य
चतुर्विंशति योजनात्परं ॥ वैश्यस्य सच्छूद्रस्य च त्रिंशद्योजनात्परं ॥ असच्छूद्रस्य
षष्टियोजनात्परं ज्ञेयं इति ॥५७॥ पक्षांतराणि तु उक्तपक्षानुसारेण ज्ञातव्यानि ॥
अत्रायं निष्कर्षः ॥ यानि एकगोत्रविषयकजननमरणातिक्रांताशौचानि ताभि
र्जायापतिभ्यां सुभ्याभ्यां आवित्राषिणानुष्टेयानि ॥ यानि पुनर्भगिनीमातुला
दिभिन्नगोत्राशौचानि तेषु जायापतिमध्ये यत्त्ववंधं यत तेनैवानुष्ठेयं

नोभाभ्यांइति॰॥५८॥आहिताग्नेर्मंत्रवद्दाहादिनमारभ्यपुत्रादिभिरात्राशौचंकार्यं॥
आहिताग्नेरप्यखिलमृते मंत्रवद्दाहात्पूर्वंपुत्रादिनामाशौचंसंध्यादिकर्मलोपश्चना
स्ति॥आहिताग्नेस्तुमरणदिनमारभ्यपुत्रादिभिस्त्रिरात्राशौचंकार्यमिति॰॥५९॥अथरा
त्रौजननेमरणेवारात्रिंत्रिभागंकृत्वा॥आद्यभागद्वयेचेत्पूर्वंदिनंपरतश्चेत्तृतीये
भागेचेदुत्तरादिनंमारभ्याशौचंकार्यं॥६०॥अर्धरात्रात्पूर्वंचेत्पूर्वदिनंपरतश्चेदु
त्तरदिनं॥प्राक्सूर्योदयात्पूर्वदिनमूर्ध्वमुत्तरदिनमितिपक्षत्रयंदेशतोदेशतोव्य
वस्थितं॥महाराष्ट्रदेशेतुआद्यपक्षमेवप्रचरंतीति॰६१॥अथाशौचसंपातेनिर्ण

(9A)

यः॥ तत्र दशाहमृतके दशाहं ततो न्यूनं वा मृतकमुपस्थितं भवति तदा शेषेणैव शुद्धिः॥
६२॥ दशाहसूतके दशाहं ततो न्यूनं वा सूतकं पतति तदा पूर्वशेषेणैव शुद्धिः॥ इति॥ ६३॥ सूतके
मध्ये दशाहं न्यूनं वा मृतकं पतति तदा पूर्वशेषेण तु शुद्धिर्नास्ति॥ ६४॥ तत्र सूतकस्य व
क्षिप्तत्वेव तु मृतकं समादाय सूतकमपि समापनीयं॥ ६५॥ व्याहादिरूप मृतके सूत
के च दशाहसूतकपाते च पूर्वेण शुद्धिर्नास्ति इति॥ ६६॥ मृतसूतकयोः समस्य न्यून
स्य वा संपाते पूर्वेण शुद्धिः॥ अधिकस्यापि सूतकस्यापि सूतकस्य शुद्धिरिति शुद्धिवि
वेककारः॥ इति॥ ६७॥ पूर्वशौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं तदुत्तरमपि का

त्र्यं०दे०

(१०)

९ यं॥ इति०६८॥ दशाह दशाहात्पररात्रौ यदि दशाहमाशौचं पतति तदा दिनद्वयमधि
कं कार्यं॥ दशाहात्पररात्रिचतुर्थयामे यदि दशाहमाशौचं भवेत्तदा दिनत्रयमधि
कं कार्यं॥ ६९॥ त्र्यहाद्याशौचानां परस्पररात्रिशेषसंपाते पूर्वेणैव शुद्धिर्न व्याह
दिवृद्धिः॥ वर्द्धितस्य द्वित्रिदिनमध्ये आशौचानंतरसंपाते चाधिकस्य पूर्वेण शु
द्धिर्नास्ति॥ समन्यूनयोस्तु पूर्वेण शुद्धिर्भवति॥ इति०७०॥ सपिंडानामाशौचं न मा
तृपितृभर्तृणां आशौचं नये तु नोपति॥ मात्राशौचमध्ये पित्राशौचं तत्सर्वशेष
णैव शुद्धिः॥ पितुः संपूर्णाशौचे न शुद्धिरित्यन्ये॥ तेषांत्रोपदे संपूर्णलक्ष

शिव

९

(10A)

ण्यपतिः इति ॥ ७१ ॥ पित्राशौच मध्ये मातृ मरणे तु पित्राशौचं समाप्य पक्षिणी ॥
मधिकं कुर्यात् ॥ इदं द्वादश रात्रेर वाक् भवति ॥ द्वादशरात्र्यां रात्रियच्चतुर्थेया
मेच मातृमरणे तु त्र्यहाएव न पक्षिणी ॥ मातुर्भर्त्तासिंहान्वारोहणे तु नाधिक
पक्षिणी ॥ इति ॥ ७२ ॥ पूर्वाशौचेन शुद्धिः ॥ स्मृतिकायामग्निप्रदे प्रेत पुत्रेषु च
नास्ति ॥ अत्र प्रेत पुत्रेति पुनर्ग्रहणं वचनांतरानुरोधेन ॥ इति ॥ ७३ ॥ सूतके
मृतके पाते पिंडदानुबंधोस्ति ॥ मृतके सूतक संपाते जातकर्मादि तु दानी
माशौचांते वा ॥ कुर्यादिति विल्वः ॥ इति ॥ ७४ ॥ मातुर्या पक्षिणी तन्मध्ये पितु

... Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अ०ब०
(11)

१० देकादशाहं श्राद्धं कुर्यात् ॥ इति ॥ ७५ ॥ शवस्पर्शे तु वा चेत् शवस्य दर्शनात् शुद्धिः ॥ रा
शौचे सत्यं दर्शनात् ॥ तदशाहान्ते दूरवासे वा ॥ अत्र तेषामाशौचं तावदाशौ
चं ॥ संसर्गाशौचे कर्मनिष्धिकारो नास्ति ॥ किंतु स्पृश्यत्वमात्रं ॥ तद्दूरस्थानां
द्रव्यानां नाशौच संबंधः ॥ स्नेहेन सर्वनिर्हारे तदशाहान्तेऽत्र दूरवासे च द
दाहः तदशाहान्ते तु दूरवासे ग्रहणम् ॥ दूरवासो अत्र भ नष्टप्रएणे निर्हरणमात्र शिव
ग्रहः ॥ इति ॥ ७६ ॥ स्नेतिग्रहेण सर्वएव निहारे दाहे च तन्नाशौचं दशाहा १०
हितं ॥ इति ॥ ७७ ॥ विजातीयमाशौचं ॥ स्नेतिग्रहेण तु विजातीयनिर्हरिदा

(11A)

हिचत्रावजातीयाद्विगुणं॥इति॰७८॥सोदकनिर्हारिदत्रणहः॥असपिंडाल्लकारणेज्ञानदुप
वासः॥अशक्तोस्नानं॥ज्ञानतःपादकृच्छ्रं॥इति॰७९॥धर्मार्थमनाथसवर्णनिर्हारक्रिया
करणेअग्निदाहेनचद्विजस्यानंयस्यकृतं॥स्नानात्शुद्धिः॥प्राणायामोग्निस्पर्शश्च॥इति॰
८०॥अनुगमनेतुसपिंडेनदोषः॥असपिंडेपिअनाथक्रियायांनदोषः॥समोल्लेखवर्णी
यस्यवानुगमनेस्नात्वा॥हुताशस्पर्शघृतसर्पिःस्नात्वाप्राणायामंकुर्यात्॥इति॰८१॥ही
नवर्णस्यवानुगमनेक्षत्रियेएकाहमाशौचं॥वैश्येपक्षिणीशूद्रेत्रिरात्रं॥पूर्ववत्स्नाना
दिच॥इति॰॥८२॥ब्रह्मचारिणःसपिंडमरणेनाशौचं॥अन्यस्यनिर्हरणेदाधोर्ध्वदे

११ हिकेधिकारो नास्ति ॥ तत्करणे पुनरुपनयनं ॥ कृच्छ्रप्रायश्चित्तं च ॥ इति० ॥८३॥
ब्रह्मचारिणः पितृमात्राचार्योपाध्यायमातामहानां मंसकर्मकुरणे दोषो नास्ति ॥
तत्र दशाहमस्पृश्यत्वलक्षणमाशौचं कार्यं न मस्पृश्यत्वमिति माधवः ॥ पि
त्राद्याशौचेपि आशौचं विना अन्नं ब्रह्मचारिनं भक्षयेदिति ॥ भक्षणे तु पुनरुपनय
नं ॥ इति० ८४ ॥ ब्रह्मचारिणः पित्राद्यदाहव्यकर्माकरणे आशौचं नास्ति ॥ स
मावर्त्तनोत्तरं पूर्वं मृतानां त्रिदिनमाशौचं कार्यमेव ॥ इति० ८५ ॥ वृत्तजीव शिव
च्छ्राद्धेणकेमप्याशौचं न कार्यं ॥ इति० ८६ ॥ परेषां सर्ववर्णानामौर्ध्वदैहि ११

(12A)

फकरणेतु॥ जासाशौचं कृत्वा षड्छत्र्या शुद्धिः॥८७॥ द्विगुणं त्रिगुणं चतुर्गुणं वादि प्रायश्चि
त्तमनुष्ठेयं॥ इति॥८८॥ आहिताग्नेरस्थिदाहे सर्वसपिंडानां दशाहाशौचं॥८९॥ अ
नाहिताग्नेस्तु अस्थिदाहे पर्णशरदाहे च पत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहा
दि पूर्णमेव॥ गृहीताशौचयोस्तु तयोरपि संस्कारकाले त्रिरात्रं॥ पत्नि संस्कारकाले
पत्यश्चैवं इति॥९०॥ अन्यसपिंडानां संस्कारकाले स्नानमात्रं॥ इदं त्रिरात्रादि
कं॥ दशाहोर्ध्वं संस्कारकरणे ज्ञेयं॥ दशाहमध्ये तु सेषदिवसैरेवाशौचं सिद्धे
रुच्युत्वात्॥ इति॥९१॥ रजस्वलास्तु यस्याः विंशतिदिनोत्तरं प्रायश्चित्तं स्नानादि

(13)

१२ र्शनि भवति तस्याः सप्तदिनपर्यंतं पुनरजो दृष्टे स्नानमात्रं ॥७॥ अष्टादशाएक
रात्रं ॥ नवदशे द्विदिनं ॥ इति ॥ १२ ॥ यस्यास्तु विंदिनाद्र्वाक्प्रायशो रजो दर्श
नं भवति तस्याः दशादिनपर्यंतं स्नानमात्रं ॥ एकादशे एकरात्रं ॥ द्वादशे
द्विदिनं त्रयोदशादारभ्य त्रिरात्रं ॥ इति ॥ १३ ॥ इति श्री त्र्यंबकीये अशौच
निर्णये पंचनवतितमो ग्रंथः ॥ अत्र रजोवचनानि मिताक्षरा माधव शिव
दिनिबंधेभ्यो ज्ञेयानि विस्तारभया द्बाला नां दुरधिगमत्वाच्च नालि १२
खितानि ॥ इति श्री सअंगिरससमुद्भूत कुलं जलधि सुधांशु परंबा
१४

(13A)

कं प्रमाणपारावारीणयाज्ञिकशिरोरत्ननारायणसूनुरघुनाथसूरिसूनुत्र्यंबक
पंडितविरताशौचनिर्णयपद्धतिः॥ इति आशौचनिर्णयः समाप्तः॥ श्रीसांबसदाशिवा
र्पणमस्तु॥ त्रिंशत्श्लोके षडुक्तं॥ ग्रामेतीतेदशाहे भवति विषयके प्राक् त्रिमासात्त्रिरा
त्रंपक्षिण्याषण्मासाद्दिनमिहनवमासात्स्नात ततःस्नानमात्रं॥ स्नानं देशांतरस्थे त्वथ
पित्रविषये देशकालाविशेषात्पूर्णं मातुः सपत्न्याश्चिदिनमिदपिक्रांतशौचसमानं
॥ संवत् १९०८ शके १७७३ विरोधकृन्नाम संवत्सरे दक्षिणायने हेमंतऋतौ कार्ति
के कृष्णपंचम्यां गुरुवारे तद्दिने पुस्तकं समाप्तं॥ इदं पुस्तकं कोराख्योपनामक काशि

न्युब॰

(15)

१२ नाथात्मजविनायकेन लिखितं ॥ स्वार्थं परोपकारार्थं ॥ श्रीरामचंद्रार्पणमस्तु ॥ छ ॥ छ ॥
यदक्षरं पदभ्रष्टं मात्राहीनं तु यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ राम शिव ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

त्र्यबं०

(15)

१४

॥इति त्र्यंबकी समाप्तः॥ छ॥ छ॥

श्री

१४

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com